17

सप्तदशः पाठः

# संस्कृतभाषायाः महत्त्वम्

## विशेषण - विशेष्यः

"संस्कृतं नाम दैवी वाक् अन्वख्याता महर्षिभिः"

**सरला सरसा संस्कृतवाणी**,
जयति **मंगला संस्कृतवाणी**।
वेदहिमाद्रेश्चिरं वहन्ती,
विमला गंगा कल्याणी।।

संस्कृतभाषा संसारस्य **सर्वासु भाषासु प्राचीनतमा भाषा** अस्ति। प्राचीनकाले संस्कृतभाषा जनसामान्यस्य भाषा आसीत्। अस्याः **साहित्यं प्राचीनं समृद्धं** चास्ति। इयं **दिव्या भाषा**। अस्याः देवभाषा, सुरवाणी, देववाणी, गीर्वाणवाणी प्रभृति नामानि अपि सन्ति। इदानीम् अपि अस्याः भाषायाः प्रयोगः प्रतिदिनं विविधसंस्कारकार्येषु भवति।

संस्कृतभाषा अनेकासां भारतीयानां भाषाणां जननी अस्ति। अस्याः **शब्दकोशः सुविशालः** अस्ति। संस्कृतभाषायाः हिन्दीभाषायाः च परस्परं जननी–पुत्री संबंधः वर्तते। भावाभिव्यक्तौ संस्कृतभाषा नूनं अतिसमर्था भाषा। इयं भाषा **स्वल्पैः शब्दैः** महदर्थ–प्रकटने समर्था अस्ति। चत्वारः वेदाः यथा ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः च, उपनिषदः, पुराणानि, अनेके **धार्मिकाः ग्रन्थाः अनेकानि शस्त्राणि** च संस्कृते निबद्धानि सन्ति। संस्कृतभाषां पठित्वा अन्यासां भाषाणाम् **अध्ययनं सरलं** भवति। संस्कृतम् अधीत्य एव वयं स्वसंस्कृतिं ज्ञातुं समर्थाः भवामः। अतः संस्कृतभाषा सर्वैः अपि पठितव्या।

सर्वप्रथमः महर्षिवाल्मीकिः संस्कृतभाषायां रामायणं नामकं महाकाव्यम् अरचयत्। मुनिना वेद–व्यासेन विरचितं महाभारतं ग्रन्थो अपि संस्कृतभाषायां विद्यते। भारते अनेके कवयः तद्यथा भासः, कालिदासः, बाणभट्टः, हर्षः, भवभूतिः, दण्डी, भारविः, माघः, शूद्रकः, विशाखदत्तः, जयदेवः, विष्णुशर्मा प्रभृतयः अभवन् ये नाटकानि, काव्यानि, महाकाव्यानि तथा गाथा–पुस्तकानि च संस्कृतभाषायाम् अलिखन्।

भारतशासनस्य राजचिह्ने मुद्रायां च अंकितः 'सत्यमेव जयते' संस्कृतपद्यांशः संस्कृतस्य महत्त्वं उद्भावयति। जीवनबीमानिगमस्य चित्रे 'योगक्षेमं वहाम्यहम्' तथा भारतीयवायुसेनायाः ध्येयवाक्यम् 'नभः–स्पृशं दीप्तम्' संस्कृतभाषायाः गौरवगाथां प्रकटयति।

## शब्दार्थाः (WORD MEANINGS)

| | | |
|---|---|---|
| मंगला | कल्याणकारिणी | Beneficial |
| वेदहिमाद्रेः | वेद रूपी हिमालय से | Himalayas like Vedas |
| अस्माकं | हमारी | Ours |
| साहित्यं | साहित्य | Literature |
| प्राचीनं | पुरानी | Oldest, ancient |
| समृद्धः | उन्नत | Rich |
| गीर्वाणवाणी | देववाणी संस्कृत | Sanskrit language |
| प्रभृति | इत्यादि | Etc. |
| काव्यानि | काव्य | Poetry |

## क्रिया (VERB)

| | | | |
|---|---|---|---|
| अलिखन् | (लिख्) | लिखा | Wrote |
| उद्भावयति | (उद् + भू) | उत्पन्न करता है | Produces |
| प्रसरति | (प्र + सृ) | फैलता है | Spreads |

## याद रखिए

**विशेषण–विशेष्य** – संज्ञा या सर्वनाम की विशेषता बताने वाले शब्द '**विशेषण**' कहलाते हैं। जिन शब्दों की विशेषता बताई जाती है उन्हें **विशेष्य** कहते हैं।

## अभ्यास (Exercises)

### मौखिक (Oral)



**संस्कृत भाषा का महत्त्व प्रदर्शित करने वाला श्लोक याद कीजिए (Learn a shloka which shows importance of Sanskrit language) –**



## लिखित (Written)

**1. निम्नलिखित प्रश्नों के उत्तर संस्कृत में दीजिए (Answer the following questions in Sanskrit) –**

(क) संस्कृतवाणी कीदृशी वर्तते ?

(ख) वेदाः कति ? के च ते ?

(ग) रामायणं केन लिखितम् ?

(घ) संस्कृतस्य हिन्दीभाषया सह कीदृशः संबंधः ?

(ङ) केषांचित् पंचानां संस्कृत–कवीनां नामानि वदत ?

**2. रिक्त स्थानों की पूर्ति कीजिए (Fill in the blanks) –**

(क) संस्कृतभाषा अस्माकं देशस्य ______ ।

(ख) संस्कृतभाषां पठित्वा अन्यासां ______ अध्ययनं सरलं भवति।

(ग) मुनिना ______ विरचितं महाभारतं सरलं भवति।

(घ) संस्कृतम् अधीत्य एव वयं ______ ज्ञातुं समर्थाः भवामः।

(ङ) संस्कृतभाषायाः हिन्दीभाषायाः च परस्परं ______ संबंधः वर्तते।

**3. विभक्ति और वचन बताइए (Tell the case and number of the following words) –**

| | विभक्ति | वचन |
|---|---|---|
| (क) हिन्दूनाम् | | |
| (ख) अनेकासु | | |

(ग) भाषायाः ______ ______

(घ) वाल्मीकिः ______ ______

(ङ) साहित्यम् ______ ______

**4. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit) –**

(क) संस्कृत एक प्राचीन भाषा है।

______

(ख) यह भाषा भारतीय भाषाओं की जननी है।

______

(ग) संस्कृत में ही प्राचीन संस्कृति स्थित है।

______

(घ) हमें संस्कृतभाषा अवश्य पढ़नी चाहिए।

______

(ङ) वेद भारत के प्राचीन ग्रंथ हैं।

______

**5. नीचे लिखे शब्दों का अपने संस्कृत वाक्यों में प्रयोग कीजिए (Use the followir words in your own Sanskrit sentences) –**

(क) भाषा ______

(ख) महर्षिः ______

(ग) अध्ययनं ______

(घ) भारते ______

(ङ) जननी ______

**6. विशेषण शब्दों का उनके विशेष्य के साथ मिलान कीजिए (Match the following) –**

| | |
|---|---|
| (क) सर्वासु | साहित्यम् |
| (ख) प्राचीनं | शब्दैः |
| (ग) सुविशालः | ग्रन्थाः |
| (घ) स्वल्पैः | अध्ययनम् |
| (ङ) धार्मिकाः | भाषासु |
| (च) सरलम् | शब्दकोशः |